**खले कपोतन्यायः** The simile of pigeons alighting on a threshing-floor. It is used by writers on Alaṁkāra to illustrate the production of a certain effect by the simultaneous action of numerous causes. In the figure समाधि, काकतालीयन्याय works, while in समुच्चय this खले कपोतन्याय is useful. cf. समुच्चयोऽयमेकस्मिन् सति कार्यस्य साधके। खले कपोतिकान्यायात् तत्करः स्यात् परोऽपि चेत्॥ S. D. 10.

**खल्वाटबिल्वीयन्यायः** The maxim of the bald ( or bare-headed ) man, and the woodapple. यथा खल्वाटः पर्यटन्नतर्कितं श्रीफलतरोरधस्तादागतो दैववशाच्च बिल्वमुपरि पतितं तद्वदन्योऽप्युभयवस्तुसंयोग एवमुच्यते। G. M. 3. 195. cf. अजाकृपाणीयन्याय and काकतालीयन्याय. खल्वाटो दिवसेश्वरस्य किरणैः संतापितो मस्तके वाञ्छन् देशमनातपं विधिवशात् तालस्य मूलं गतः। तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः॥ Bh. 2. 90.

**गगनारविन्दन्यायः** The maxim of a sky-lotus. मूषकविषाणन्याय and this one are used to illustrate अत्यन्ताभाव.

**गड्डरिकाप्रवाहन्यायः** The maxim of a continuous rush of sheep. It is used to indicate the blind following of others like a flock of sheep. गड्डरिकानामवीनां संघादेका चेन् नद्यादौ पतति तदा तत्संघान्तर्गताः सर्वा अपि वार्यमाणा अपि तत्र पतन्तीति लोकप्रसिद्धया यत्र वार्यमाणानामपि अनिष्टमार्गे धावनं तत्रास्य प्रवृत्तिः। वाचस्पत्य.

**गन्धर्वनगरन्यायः** The illustration of the city of गन्धर्वs. It is used to denote the unreality of this world on the analogy of the गन्धर्वनगर which is non-existent. अनेकवर्णे वियतीन्द्रचापं ग्रहात् समन्तात् परिवेष उक्तः। तथैव भानां पतनं च विद्युत् तथैव गन्धर्वपुरं विचित्रम्॥ तत्त्वविवेक.

**गार्हपत्यन्यायः** Vide Dictionary p. 658.

**गिरिमुत्पाट्य मूषिकोद्धृता** cf. Marāṭhī ‘ डोंगर पोखरून उंदीर काढणें. ’ यत्र कृतेऽपि बह्वायाससाध्ये कर्मणि, तुच्छफलोपलब्धिस्तत्रायं प्रवर्तत इति। लौ. न्याय.; खनन्नाखुबिलं सिंहः पाषाणशकलाकुलम्। प्राप्नोति नखभङ्गं वा फलं वा मूषको भवेत्॥ Pt.

**गुडजिह्विकान्यायः** The maxim of the tongue [smeared] with treacle [ in order to disguise an unpalatable draught ]. अर्थवाद in शास्त्र and उपदेश in काव्य serve the purpose of गुडजिह्विका. Read: यथा तिक्तताभिया निम्बपानमकुर्वाणस्य बालस्य जिह्वायां गुडलेपं दत्त्वा पित्रादिस्तं निम्बं पाययति एवमर्थवादवाक्यानि बह्वायाससाध्ये कर्मण्यप्रवर्तमानं पुरुषं स्वर्गाक्षय्यादिकं श्रावयित्वा प्रवर्तयन्ति। फलश्रुतिरपि रोचनार्था। वाचस्पत्य; ये सुकुमारमतयोऽतिसुखिस्वभावा राजकुमारादयो नीरसे नीतिशास्त्रे प्रवर्तयितुमशक्यास्तान् काव्यं कान्तेव सरसतापादनेनाभिमुखीकृत्योपदेशं ग्राहयति गुडजिह्विकया शिशूनिवौषधम्। यथाहुः—स्वादुकाव्यरसोन्मिश्रं वाक्यार्थमुपभुञ्जते। प्रथमालीढमधवः पिबन्ति कटु भेषजम्॥ काव्यप्रदीप.

**गोदोहनन्यायः** The simile of the milk-pail. It is used as an illustration of something which is occasionally, and not universally connected with an act or performance as an essential part of it. काम्यसूक्तानां महाव्रते आज्यशस्त्रत्वेन यथोक्तानां गोदोहनन्यायेन पुरुषार्थत्वमेव न क्रत्वर्थत्वम्। ŚB. on MS. 4. 1. 2; सन्ति कर्माङ्गव्यपाश्रयाणि विज्ञानानि ‘ ओमित्येतदक्षरमुद्गीथमुपासीत ’ इत्येवमादीनि। किं तानि नित्यान्येव स्युः कर्मसु पर्णमयीत्वादिवदुतानित्यानि गोदोहनादिवदिति विचारयामः। ... तस्माद्यथा क्रत्वाश्रयाण्यपि गोदोहनादीनि फलसंयोगादनित्यानि एवमुद्गीथाद्युपासनानीत्यपि द्रष्टव्यम्। Ś. B. on Br. Sūt. 3. 3. 42.

**गोबलीवर्दन्यायः** The maxim of the cattle and the bull. cf. ब्राह्मणवसिष्ठन्याय and ब्राह्मणपरिव्राजकन्याय. बलीवर्दस्य गोविशेषत्वेऽपि बलीवर्दस्य झटिति गोत्वेन बोधनार्थं यथा प्रयोगस्तथान्ययोः सामान्यविशेषरूपयोर्झटिति बोधनार्थं यत्र प्रयोगस्तत्रास्य प्रवृत्तिः। वाचस्पत्य; अत्र चानेकशब्दोपादाने गोबलीवर्दन्यायेन पुनरुक्तिपरिहारः। Kull. on Ms. 8. 28; यद्यप्ययं न्यायः पूर्वन्याय ( ब्राह्मणवसिष्ठ )-समानार्थकप्रायोऽस्ति तथापि ह्येतावांस्तु विशेषः। यत्र विशेषणोपात्तस्य प्राशस्त्यमभिप्रेतं तत्र पूर्वन्यायप्रवृत्तिः, यत्र तन्नास्ति किं तु प्रसिद्ध्यप्रसिद्धिनिबन्धनं भवेत् तत्रायं प्रवर्तते। लौ. न्याय.

**ग्रहैकत्वन्यायः** Vide Dictionary p. 679.

**ग्राव्णि रेखेव** “ Like a delineation on stone. ” It is used of something unalterably fixed. cf. Marāṭhī ‘ काळ्या दगडावरची रेघ. ’ तन्मां वज्रकुमाराय संप्रदत्तान् यथा तु मे। मरणं शरणं तात ग्राव्णि रेखेव गीरियम्॥ हेमचन्द्र.

**घटप्रदीपन्यायः** The simile of a lighted lamp inside a vessel. This maxim teaches that as the lamp continues to burn after it has lighted up the interior of the vessel, and is indeed essential to the continuance of that illumination, so the expressed meaning of a sentence is absolutely essential as a basis for the figurative meaning which it also conveys. cf. न त्वेष वाच्यव्यङ्ग्ययोर्न्यायः। न हि व्यङ्ग्ये प्रतीयमाने वाच्यबुद्धिर्दूरीभवति। वाच्यावभासाविनाभावेन तस्य प्रकाशनात्। तस्माद् घटप्रदीपन्यायस्तयोः। यथैव हि प्रदीपद्वारेण घटप्रतीतावुत्पन्नायां न प्रदीपप्रकाशो निवर्तते तद्वद् व्यङ्ग्यप्रतीतौ वाच्यावभासः। ध्वन्यालोक 3. 33.

**घटानां निर्मातुस्त्रिभुवनविधातुश्च कलहः** अस्य न्यायस्य अल्पशक्तिमतो बहुशक्तिमता सह विग्रहविवक्षायामवतार इति। लौ. न्याय. cf. हठादाकृष्टानां कतिपयपदानां रचयिता जनः स्पर्धालुश्चेदहह कविना वश्यवचसा। भवेदद्य श्वो वा किमिह बहुना पापिनि कलौ घटानां निर्मातुस्त्रिभुवनविधातुश्च कलहः॥ Bh. 2.

**घटीयन्त्रन्यायः** This has the same meaning and application as the कूपयन्त्रघटिकान्याय. See: आपद्गतं हससि किं द्रविणान्धमूढ लक्ष्मीः स्थिरा न भवतीति किमत्र चित्रम्। किं त्वं न पश्यसि घटीर्जलयन्त्रचक्रे रिक्ता भवन्ति भरिता भरिताश्च रिक्ताः॥ प्रबन्धचिन्तामणि. The maxim occurs as अरघट्टघटीयन्त्रन्याय. The word अरघट्ट has become राहाट in Marāṭhī as in राहाटगाडगे.

**घट्टकुटीप्रभातन्यायः** The maxim of day-break near a toll-station. It takes its origin from the attempt of one ( say, a cartman ) who with the intention of avoiding a toll takes at night an unfrequented road, but unfortunately finds himself at day-break near the very toll-station and is obliged to pay the toll which he studiously tried to avoid. Thus the maxim is used to denote the occurrence of that which one studiously tries to avoid. The saying is employed to illustrate उद्देश्यासिद्धि, that is, failure to accomplish a desired object.